# श्रीकृष्णमङ्गलम्

मङ्गलं बालकृष्णाय दिव्य लीलाय मङ्गलम् ।
मङ्गलं नीलवर्णाय मातृ मान्याय मङ्गलम् ॥ १॥

मङ्गलं रुक्मिणीशाय जगदीशाय मङ्गलम् ।
मङ्गलं यदुनाथाय दीननाथाय मङ्गलम् ॥ २॥

मङ्गलं देवदेवाय वासुदेवाय मङ्गलम् ।
मङ्गलं नन्दपुत्राय सदानन्दाय मङ्गलम् ॥ ३॥

मङ्गलं पूतना हन्त्रे लीलामर्त्याय मङ्गलम् ।
मङ्गलं शकटच्छेत्रे पद्मपादाय मङ्गलम् ॥ ४॥

मङ्गलं वत्सपालाय विश्वपालाय मङ्गलम् ।
मङ्गलं योगिमृग्याय गोपमित्राय मङ्गलम् ॥ ५॥

मङ्गलं बालगोपाय ब्रह्मविद्याय मङ्गलम् ।
मङ्गलं कमलाभर्त्रे गोपीकान्ताय मङ्गलम् ॥ ६॥

मङ्गलं मातृबद्धाय जडघ्नायास्तु मङ्गलम् ।
मङ्गलं क्रीडते स्त्रीभिः कुन्दारूढाय मङ्गलम् ॥ ७॥

मङ्गलं द्विषते क्रूरान् प्रियाक्रूराय मङ्गलम् ।
मङ्गलं वल्लवीभर्त्रे कंसघ्नायास्तु मङ्गलम् ॥ ८॥

मङ्गलं प्रीत भक्ताय विद्यावासाय मङ्गलम् ।

मङ्गलं मागधजिते द्वारकेशाय मङ्गलम् ॥ ९॥

मङ्गलं पार्थ सुहृदे जितदैत्याय मङ्गलम् ।
मङ्गलं रुक्मिणी जाने रुक्मिणीशाय मङ्गलम् ॥ १०॥

मङ्गलं नैकरूपाय नरदैत्याय मङ्गलम् ।
पुत्रिणे नित्यरूपाय ब्रह्माचार्याय मङ्गलम् ॥ ११॥

मङ्गलं द्रौपदीड्याय मानदायास्तु मङ्गलम् ।
मङ्गलं प्रिय भक्ताय भक्त पालाय मङ्गलम् ॥ १२॥

मङ्गलं दिशते कामान् विप्र प्रार्थ्याय मङ्गलम् ।
मङ्गलं शिष्ट पालाय भारघ्नायास्तु मङ्गलम् ॥ १३॥

मङ्गलं मायिनेऽमाय सारथ्यायास्तु मङ्गलम ।
मङ्गलं पूर्णरूपाय गीताचार्याय मङ्गलम् ॥ १४॥

मङ्गलं विश्वरूपाय योगिध्येयाय मङ्गलम् ।
मङ्गलं विश्वगुरवे कृपावासाय मङ्गलम् ॥ १५॥

मङ्गलं ज्ञानरूपाय सर्वाभिज्ञाय मङ्गलम् ।
मङ्गलं सर्वशक्ताय महासत्त्वाय मङ्गलम् ॥ १६॥

मङ्गलं दिव्य वीर्याय माहेश्वर्याय मङ्गलम् ।
मङ्गलं तेऽच्युता य सत्कुलत्राणाय मङ्गलम् ॥ १७॥

इति श्रीकृष्णमङ्गलं सम्पूर्णम् ।